# Shrivishnupadi or Gangastotram

# શ્રીવિષ્ણુપદી અથવા ગઙ્ગાસ્તોત્રમ્ બ્રહ્મવૈવર્તપુરાણાન્તર્ગતમ્

## Document Information

Text title : viShNupadI or gangAstotram from brahmavaivartapurANa

File name : viShNupadIgangAstotramBVP.itx

Category : vishhnu, stotra, devii, devI, vishnu

Location : doc_vishhnu

Transliterated by : Singanallur Ganesan singanallur at gmail.com, PSA Easwaran

Proofread by : Singanallur Ganesan singanallur at gmail.com, PSA Easwaran

Description-comments : brahmavaivartapurANa prakRitikhaNDa adhyAya 10

Latest update : January 31, 2013

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શ્રીવિષ્ણુપદી અથવા ગઙ્ગાસ્તોત્રમ્ બ્રહ્મવૈવર્તપુરાણાન્તર્ગતમ્

ૐ નમો ગઙ્ગાયૈ ।
શ્રીબ્રહ્મોવાચ ।
શ્રોતુમિચ્છામિ દેવેશ લક્ષ્મીકાન્ત નમઃ પ્રભો ।
વિષ્ણો વિષ્ણુપદીસ્તોત્રં પાપઘ્નં પુણ્યકારણમ્ ॥ ૧૧૩॥

શ્રી નારાયણ ઉવાચ ।
શિવસઙ્ગીતસંમુગ્ધશ્રીકૃષ્ણાઙ્ગદ્રવોદ્ભવામ્ ।
રાધાઙ્ગદ્રવસમ્ભૂતાં તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૧૧૪॥

યા જન્મસૃષ્ટેરાદૌ ચ ગોલોકે રાસમણ્ડલે ।
સંનિધાને શંકરસ્ય તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૧૧૫॥

ગોપૈર્ગોપીભિરાકીર્ણે શુભે રાધામહોત્સવે ।
કાર્તિકીપૂર્ણિમાજાતાં તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૧૧૬॥

કોટિયોજનવિસ્તીર્ણા દૈર્ઘ્યે લક્ષગુણા તતઃ ।
સમાવૃતા યા ગોલોકં તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૧૧૭॥

ષષ્ટિલક્ષૈર્યોજનૈર્યા તતો દૈર્ઘ્યે ચતુર્ગુણા ।
સમાવૃતા યા વૈકુણ્ઠં તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૧૧૮॥

વિંશલ્લક્ષૈર્યોજનૈર્યા તતો દૈર્ઘ્યે ચતુર્ગુણા ।
સમાવૃતા બ્રહ્મલોકં યા તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૧૧૯॥

ત્રિંશલ્લક્ષૈર્યોજનૈર્યા દૈર્ઘ્યે પઞ્ચગુણા તતઃ ।
આવૃતા શિવલોકં યા તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૧૨૦॥

ષડ્યોજનસુવિસ્તીર્ણા દૈર્ઘ્યે વશગુણા તતઃ ।
મન્દાકિની યેન્દ્રલોકે તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૧૨૧॥

લક્ષયોજનવિસ્તીર્ણા દૈર્ઘ્યે સપ્તગુણા તતઃ ।

આવૃતા ધ્રુવલોકં યા તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૧૨૨॥

લક્ષયોજનવિસ્તીર્ણા દૈર્ઘ્યે ષડ્ગુણિતા તતઃ ।
આવૃતા ચન્દ્રલોકં યા તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૧૨૩॥

યોજનૈઃ ષષ્ટિસાહસ્રૈર્દૈર્ઘ્યે દશગુણા તતઃ ।
આવૃતા સૂર્યલોકં યા તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૧૨૪॥

લક્ષયોજનવિસ્તીર્ણા દૈર્ઘ્યે ષડ્ગુણિતા તતઃ ।
આવૃતા સત્યલોકં યા તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૧૨૫॥

દશલક્ષૈર્યોજનૈર્યા દૈર્ઘ્યે પઞ્ચગુણા તતઃ ।
આવૃતા યા તપોલોકં તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૧૨૬॥

સહસ્રયોજના યા ચ દૈર્ઘ્યે સપ્તગુણા તતઃ ।
આવૃતા જનલોકં યા તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૧૨૭॥

સહસ્રયોજનયામા દૈર્ઘ્યે સપ્તગુણા તતઃ ।
આવૃતા યા ચ કૈલાસં તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૧૨૮॥

પાતાલે યા ભોગવતી વિસ્તીર્ણા દશયોજના ।
તતો દશગુણા દૈર્ઘ્યે તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૧૨૯॥

ક્રોશૈકમાત્રવિસ્તીર્ણા તતઃ ક્ષીણા ન કુત્રચિત્ ।
ક્ષિતૌ ચાલકનન્દા યા તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૧૩૦॥

સત્યે ય ક્ષીરવર્ણા ચ ત્રેતાયામિન્દુસંનિભા ।
દ્વાપરે ચન્દનાભા ચ તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૧૩૧॥

જલપ્રભા કલૌ યા ચ નાન્યત્ર પૃથિવીતલે ।
સ્વર્ગે ચ નિત્યં ક્ષીરાભા તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૧૩૨॥

યસ્યાઃ પ્રભાવ અતુલઃ પુરાણે ચ શ્રુતૌ શ્રુતઃ ।
યા પુણ્યદા પાપહર્ત્રી તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૧૩૩॥

યત્તોયકણિકાસ્પર્શઃ પાપિનાં ચ પિતામહ ।
બ્રહ્મહત્યાદિકં પાપં કોટિજન્માર્જિતં દહેત્ ॥ ૧૩૪॥

ઇત્યેવં કથિતં બ્રહ્મન્ગઙ્ગાપદ્યૈકવિંશતિમ્ ।
સ્તોત્રરૂપં ચ પરમં પાપઘ્નં પુણ્યબીજકમ્ ॥ ૧૩૫॥

નિત્યં યો હિ પઠેદ્ભક્ત્યા સમ્પૂજ્ય ચ સુરેશ્વરીમ્ ।
અશ્વમેધફલં નિત્યં લભતે નાત્ર સંશયઃ ॥ ૧૩૬॥

અપુત્રો લભતે પુત્રં ભાર્યાહીનો લભેત્પ્રિયામ્ ।
રોગાન્મુચ્યેત રોગી ચ બદ્ધો મુચ્યેત બન્ધનાત્ ॥ ૧૩૭॥

અસ્પષ્ટકીર્તિઃ સુયશા મૂર્ખો ભવતિ પણ્ડિતઃ ।
યઃ પઠેત્પ્રાતરુત્થાય ગઙ્ગાસ્તોત્રમિદં શુભમ્ ॥ ૧૩૮॥

શુભં ભવેત્તુ દુસ્સ્વપ્નં ગઙ્ગાસ્નાનફલં ભવેત્ ॥ ૧૩૯॥

ઇતિ શ્રીબ્રહ્મવૈવર્તે મહાપુરાણે પ્રકૃતિખણ્ડે નારદનારાયણસંવાદે
ગઙ્ગોપાખ્યાને દશમોઽધ્યાયાન્તર્ગતં ગઙ્ગાસ્તોત્રં સમ્પૂર્ણમ્ ॥

From brahmavaivartapurANa prakRitikhaNDa adhyAya 10

Encoded and proofread by
Singanallur Ganesan singanallur at gmail.com

---

*Shrivishnupadi or Gangastotram*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*